**प्राजहा** अव्य० हानिक्रियायाम् शाका० वा गतिसंज्ञा। प्राजहाकृत्य प्राजहा कृत्वा वा।

**प्राजहित** पु० गार्हपत्येऽग्नौ कात्या०श्रौ० ८।६।१२

**प्राजापत** त्रि०प्रजापतेः धर्म्यं महिष्या०अण्। प्रजापतेर्धर्म्ये

**प्राजापत्य** पु० प्रजापतिर्देवताऽस्य यक्। १अष्टविवाहमध्ये विवाहभेदे "ब्राह्मो दैवस्तथैवार्षः प्राजापत्यस्तथाऽऽसुरः" मनुना अष्ट विवाहानुद्दिश्य "सहोभौ चरतां धर्ममिति वाचानुभाष्य च। कन्याप्रदानमभ्यर्च्य प्राजापत्यो विधिः स्मृतः" इति लक्षित."त्र्यहं प्रातस्त्र्यहं सायं त्र्यहमद्या-दयाचितम्। त्र्यहं परञ्च नाश्नीयात् प्राजापत्यमिति स्मृतम्" इति स्मृत्युक्ते द्वादशाहसाध्ये २व्रतभेदे न०। ३प्रजापत्यधिदेवताके चर्वादौ त्रि०। ४प्रव्रज्याश्रमाङ्गे सर्वस्वदक्षिणकेष्टिभेदे स्त्री "प्राजापत्यां निरुप्येष्टिं सर्ववेदसदक्षिणाम्। आत्मन्यग्नीन् समारोप्य ब्राह्मणः प्रव्रजेद्गृहात्" याज्ञ०। ५रोहिणीनक्षत्रे न० ६प्रयागतीर्थे न० त्रिका० ७जैनभेदे पु० हेमच०। [जायाया धर्म्ये।

**प्राजावत** त्रि० प्रजावत्या धर्म्यं महिष्या० अण्। भ्रातृ-

**प्राजिन्** पु०प्र+अज–णिनि व्यभावः। पक्षिभेदे मेदि० अमरः

**प्राजितृ** पु० प्र+अज–तृच् वीभावाभावः। सारथौ।

**प्राजेश** न०प्रजेशो देवताऽस्य अण्। १रोहिणीनक्षत्रे २प्रजा-पतिदेवताके चर्वादौ त्रि०। प्राजेश्वरादयोऽप्युभयत्र।

**प्राज्ञ** पु०प्रकर्षेण जानाति प्र–ज्ञा–क स्वार्थे अण्। १पण्डिते अमरः २राजशुके राजनि०। प्रज्ञाऽस्त्यस्य अण्। ३बुद्धिमति ४दक्षे च त्रि०। प्रज्ञा+स्वार्थे ण। ६बुद्धौ स्त्री टाप्। प्राज्ञस्य पत्नी ङीप्। प्राज्ञी ७प्राज्ञपत्न्यां स्त्री। ७कल्किनो ज्येष्ठभ्रातरि पु० कल्किपु० २अ०। प्रकर्षेण अज्ञः। वेदान्तसारोक्ते व्यष्ट्युपहितचैतन्ये एकाज्ञानमात्रभासके जीवचैतन्ये पु० "एतदुपहितचैत-न्यमल्पज्ञत्वानीश्वरत्वादिगुणकं प्राज्ञ इत्युच्यते। एका-ज्ञानावभासकत्वादस्य प्राज्ञत्वम् अस्पष्टोपाधितयाऽनति-प्रकाशकत्वम्" वेदान्तसारः। प्रज्ञ+स्वार्थे अण् स्त्रियां ङीप्। प्राज्ञी ८सूर्य्यपत्न्याम् स्त्री। [त्रि० हेमच०।

**प्राज्य** न०प्रकृष्टमाज्यं प्र+अन्ज–क्यप् वा। १प्रकृष्टघृते २प्रचुरे

**प्राञ्च्** त्रि० प्र+अन्च्+क्विप्। पूर्वदेशकालवर्त्तिनि। अञ्चेर्न-लोपाभावात् भत्वे प्राञ्चः प्राञ्चा इत्येव।

**प्राञ्जल** त्रि० प्र+अन्ज–अलच्। १सरले २सुबोधे च जटा०।

**प्राञ्जलि** त्रि० प्रबद्धोऽञ्जलिर्येन प्रा०स०। १बद्धाञ्जलिपुटे प्रा०स०। २बद्धाञ्जलौ पु०।

**प्राञ्जलिन्** त्रि० प्राञ्जलिरस्त्यस्य व्रीह्या० इनि। बद्धा-ञ्जलियुक्ते स्त्रियां ङीप्।

**प्राडाहत** पु० ६त०। प्रकृष्टकारकेणाहते तस्यापत्यमिञ् प्राडाहति तदपत्ये ततः यूनि फक् तौल्व० न लुक्। प्राडाहतायन तदीये यून्यपत्ये पुंस्त्री०।

**प्राड्वि(वा)वेक** पु० अर्थिप्रत्यर्थिनौ पृच्छति प्रच्छ–क्विप् प्राट्, तयोर्वाक्यं विरुद्धाविरुद्धतया विवेचयति वक्ति वा वि+विच–वि+वच–वा संज्ञायां घञ् कर्म०। व्यव-हारदर्शनाय राजनियुक्ते १विचारके स्वयं विचारक २नृपसहाये च तल्लक्षणादिकं वीरमि० उक्तं यथा "विवादे पृच्छति प्रश्नं प्रतिप्रश्नं तथैव च। प्रियपूर्वं प्रागवदति प्राड्विवाकस्ततः स्मृतः" बृहस्पतिः। व्यासो-ऽपि "विवादानुगतं पृष्ट्वा ससभ्यस्तत् प्रयत्नतः। विचारयति येनासौ प्राड्विवेकस्ततः स्मृत." गौतमेन तु बृहस्पतिवद्योगार्थः प्राड्विवाकशब्दस्य दर्शितः। "प्राड्विवाको वादिप्रतिवादिनौ पृच्छतीति प्राट् ताभ्या-मुक्तं सभ्यैः सह विविच्य वक्तीतिप्राड्विवाकः" इति बृहस्पतिना। विचारयतीत्यभिधानाद्विविनक्ति इति विवे-कशब्दस्य व्युत्पत्तिरुक्ता। विविच्य वक्तीति विवाक इति। इति गौतमेन। नारदहारीतौ "यथा शल्यं भि-षक्कायादुद्धरेद्यत्नयुक्तितः। प्राड्विवाकस्तथा शल्य-मुद्धरेद्व्यवहारतः" इति। शल्यञ्च धर्मस्याधर्ममिश्र-णम्। यथा च मनुः "विद्धो धर्मो ह्यधर्मेण सभां यत्रोपतिष्ठते। शल्यञ्चास्य निकृन्तन्ति विद्धास्तत्र सभा-सद" इति। अयञ्च राज्ञा स्वयंव्यवहारदर्शने क्रियमा-णेऽस्य सहायः "सप्राड्विवाकः" इति स्मरणात्। यदा तु राजा कार्य्यान्तरव्यग्रतया स्वास्थ्याभावेन वा स्वयं व्यवहारदर्शनासमर्थस्तदा तत्प्रतिनिधिः। "यदा स्वयं न कुर्यात् तु नृपतिः कार्य्यदर्शनम्। तदा नियुञ्ज्या-द्विद्वांसं ब्राह्मणं कार्य्यदर्शने। सोऽस्य कार्य्याणि सम्प-श्येत् सभ्यैरेव त्रिभिर्वृतः। सभामेव प्रविश्याग्र्यामा-सीनः स्थित एव वा" इति मनुवचनात्। सभ्यग्रहणा-दमात्यादिनिवृत्तिः त्रिग्रहणात् संख्यान्तरनिवृत्तिः। अस-भ्यानामिति स्मृतिचन्द्रिकाकारः। तत्र दृष्टार्थत्वप्रसङ्गा-दयुक्तमित्युपलक्षणत्वमेव न्याय्यम्। "अपश्यता कार्यवशा-द्व्यवहारान्नृपेण तु। सभ्यैः सह नियोक्तव्यो ब्रा-ह्मणः सर्वधर्मवित्" इति याज्ञवल्क्यवचनाच्च। "यदा न कुर्यान्नृपतिः स्वयं कार्यविनिर्णयम्। तदा तत्र